International Journal of Sanskrit Research 2022; 8(5): 04-06

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 04-06
© 2022 IJSR
www.anantaajournal.com
Received: 05-05-2022
Accepted: 09-06-2022

**Rajakrishnan VK**
Sanskrit Research Scholar,
Department of Sanskrit, Sri Chandrsekharendra Saraswati Visw Mahavidyalaya (SCSVMV) Enatur, Kanchipuram, Tamil Nadu, India

**Corresponding Author:**
**Rajakrishnan VK**
Sanskrit Research Scholar,
Department of Sanskrit, Sri Chandrsekharendra Saraswati Visw Mahavidyalaya (SCSVMV) Enatur, Kanchipuram, Tamil Nadu, India

# तोल-अतुलयोः तुलनात्मक समीक्षणम्

**Rajakrishnan VK**

## प्रस्तावना

संस्कृतं स्मरणातीतकालतः भारतस्य सांस्कृतिक साहित्यात्मक पैतृकस्य च संवाहकत्वमभजत। कवयः पण्डिताः च वैदिककालादारभ्य एतां परम्परां परिपोषयामास। प्रदेशिकभाषाः कालेन विकासमुपगताः तत्र स्वतन्त्र साहित्यावृद्धावपि संस्कृतसाहित्यस्य प्रौढिः प्रसक्तिःच प्रवर्धमाना आसीत्। अत एव अनेके कवयः संस्कृते एव स्वीय रचनावैदग्ध्यं प्रकटयामास। संस्कृतसाहित्यस्य विविधशाखाभ्यः केरलस्य योगदानम् अतिविपुलमेव। संस्कृतभाषायाः प्रसारणे, तस्याः विचारसम्पदि च प्राचीनकेरलस्य विभिन्नसमुदायानां तथा मठानां च महत्स्थानम् आसीत्। केरलेषु क्रिस्तोः परं पञ्चमशतकात् परं महतां संस्कृतविदुषां जन्मना अलंकृता अभूत्। केरलीय कविवरेषु अन्यतमोऽयं तोलः किन्नामधारी, कुत्र कदा जीवनं निनायेति सूक्ष्मतया स्पष्टतया च वक्तुं न पारयामः। क्रिस्तुवर्षे द्वादशोत्तरसहस्रतमवर्षतः त्रिचत्वारिंशदुत्तरसहस्रतमवर्षं पर्यन्तमस्ति मूषकवंशनृपतेः श्रीकण्ठस्य कालः तदभ्यन्तरे तत्सदस्यत्वेन जीवमानः अतुलः एष एवेति अभिप्रायोऽप्यस्ति । केरले कोडुङ्ङल्लूर परिसरे कोण्डोषिञ्ञार प्रदेशे कस्मिंश्चित् ब्राह्मणगृहे नीलकण्ठनाम्ना अयं प्रादुर्भूत इति केचन अभिप्रयन्ति। कैरलीसाम्राजः कुलशेखरवर्माख्यस्य चेरमान्पेरुमाल्महाशयस्य समकालिकः तिरुवञ्चिक्कुले न्यवसत् इति कर्णाकर्णिकया श्रूयते । कवेरस्य बाल्य एव पिता दिवंगतः। बाल्यादारभ्य सूक्ष्मबुद्धिः युक्तिशाली, फलितवक्ता चासीत् ।

अथैकदा अयं स्वीयगृहे भोजनं कुर्वन्नासीत् । ब्राह्मणगृहेषु भोजनवेलायां वार्तालापः निषिद्धमासीत्,अथवा किमपि वक्तव्यं चेत् संस्कृतेन वदेत् इति व्यवस्था अपि आसीत्। [1] एतस्मिन्नवसरे तत्रत्य कर्मचारिणी चक्की धान्यसंभरणीतः धान्यमपहर्तुं उद्युक्ताऽभवत्। एतद्विषयं कथं वक्व्यम् इति चिन्तिते सति एषः तावत् संस्कृतज्ञः नासीत् इत्यतः “पनसि दशायां पाशि” इति सः अवदत्। चक्की धान्यसंभरण्यां प्राविशत् इति तस्य आशयः। माता विषयमवगत्य साक्षादागत्य तां गृहीतवती । उचितशासनं चादात् ।

ततःप्रभृति माता पुत्रः च सूक्ष्मतया विलोकयतीत्यतः स्वल्पमपि वस्तु अपहर्तुं सा न अशक्नोत्। अतः तस्याः मनसि कुमारं प्रति नीरसमजनयत् । कुमार एव एतदर्थं तत्र विघातः इति प्रत्यभिज्ञाय तं कथञ्चिदपि वशीकर्तुं प्रायतत। श्रृङ्गारचेष्टाभिः नर्मभाषणैः च तं आचकर्ष। षोडशवयसः परमेव ब्राह्मणकुमाराणां समावर्तनं प्रचलति स्म। तावत्पर्यन्तं ब्रह्मचर्यव्रतं परिपालनीयमासीत्। किन्तु ततःपूर्वमेव एषः मन्मथाक्रान्तपरवशः तस्याः अपाङ्गवलये न्यपतत् । ब्रह्मचर्यव्रतभङ्कहेतुना विधिवत्प्रायश्चित्तकार्याणि कारयितुं कोऽपि नोद्युक्तः। यथावसरम् एषः सर्वानपि फलितरसपूर्णप्रयोगैः उपहसतीत्यतः पुरोहिताः अपि तस्य विषये तावन्मात्र श्रद्धां न कृतवन्तः। अपि च आचार्यवर्याः सम्मिल्य समाजभ्रष्टः इति मुद्रितः च। ततः सः उपनयनकाले यज्ञोपवीतेन सह धृतं कृष्णाजिनं किञ्चित्कालं अधिकतया धृतमिति श्रूयते । कृष्णाजिनस्य कैरलीभाषायां "तोल्" इति कथनमपि अस्ति । तोल् अस्य अस्तीति "तोलः"इति नामधेयमप्यस्यापतितम्। किञ्चिदनन्तरं स्ववयमेव गले विद्यमानं कृष्णाजिनं निष्कासितवान् इत्यपि श्रूयते । कालान्तरे समाजभ्रष्ट इत्यतः पाणिग्रहणमपि यथाकालं नाभवत्। एतत्सर्वं सोढ्वा सः विवेकशाली शास्त्राणि सम्यगधीत्य पारङगतोऽभूत् । स्थिरोत्साहेन महान् पण्डितः,कविश्चाभवत्। तथापि प्रकृत्या विद्यमान परिहासशीलस्य फलितप्रयोगस्य च नातिलोपोऽभवत्। कवेरस्य फलितोक्तिषु एकमत्र सूचयितुं उत्सहे –

अर्कशुष्कफलकोमलस्तनी शर्करासदृश चारुभाषिणी ।
तन्त्रिणीदलसमानलोचने सिन्धुरेन्द्ररुचिरामलद्युते।।
अपि च कमपि वन्दन श्लोकमनेन विरचिमित्युपलब्धम्-
मारारे तवदासोहं वारि यस्य जटान्तरे ।
यंप्राहुरव्ययं नित्यं तन्त्रिणेत्रं नमाम्यहम् ।।

संस्कृत साहित्यमण्डले शब्दचमत्काराय तथा पादपूरणाय च निरर्थकपदपदप्रयोगं ये कुर्वन्ति तान् कविनानेन फलितप्रयोगेण परिहसति यथा –

थप्रथनन्दानन्दं पदद्वयं नात्र
जनितनन्दानन्दं तनयं वन्दे
वक्त्या निरन्वयं
दलितदानवन्देवक्त्याः। एवमेव
उत्तिष्ठोत्तिष्ठ राजेन्द्र
मुखंप्रक्षालयस्व टः
एषखः आह्वयते कुक्कु
च वै तु हि च वै तु हि

महोदयपुरेशचरितमिति महाकाव्यमपि कविनानेन विरचितमिति ज्ञायते। कुलशेखरवर्मा महोदयः इति चेरमान्पेरुमाल् महोदयेन अभिषेकं, तपतीसंवरणं, सुभद्राधनञ्जयं, इति नाटकत्रयं निर्माय चाक्यारजनैः वेदिकायां उपस्थापयितुं प्रायतत। एतस्य चचर्चावेलायं तोलकविना विमर्शनमकरोत् । विषण्णः राजा तद्दिने कविना साकमुपविश्य अभिनयप्रकारमाविष्कर्तुं निश्चिकाय । केरलीय कलारूपाणां कूत्त् कूटियाट्टं इत्येतयोः वेषभूषाः मुद्राः अभिनयप्रकाराः च मिलित्वा आट्टप्रकारम्, क्रमदीपिका इति ग्रन्थद्वयं अनेनैव प्रणिनायेति दृश्यते। [2] ततः परं राज्ञा नागानन्दम्, आश्चर्यचूडामणिः कल्याणसौगन्धिकम्, इत्येतान्यपि तोलकवेः साहाय्येन रङ्गाविष्कारसमर्थमकरोत् ।
केरलीयसंस्कृत चरित्र काव्येषु अन्यतमस्य पञ्चदश सर्गात्मकस्य मूषिकवंशमहाकाव्यस्य कर्ता द्वादश तम शतकस्य पूर्वार्धे जीवमानः अतुलः मूषिकवंशपरम्परायां श्रीकण्ठमूषिकनृपतेः सदस्यः आसीदित्यपि अनुमन्यते । रामघटमूषिकनृपतितः श्रीकणण्ठमूषिकपर्यन्तं पञ्चदशोत्तरशत नरपतीनां शासनकालः काव्यस्यास्य इतिवृत्तम्। काव्येऽस्मिन् चरित्रवर्णनम् ऐतिह्यविषयाः अपि सम्मिल्य काव्यात्मकतया विवृणोति। अन्तिमे सर्गे कविनानेन स्वीयसमकालिकं कण्डकारिवर्माणं अथवा श्रीकण्ठमूषिकमधिकृत्य प्रस्तौति एवं-

श्रीकण्ठ इत्यवरजोऽथनृपस्य तस्य श्रीकण्ठपादसरसीरुह राजहंसः ।

श्रीकण्ठनाथ इव शौर्यगुणेनहर्ष-श्रीकण्ठसङ्गिनिभुजे भुवमाससज्ज।। [3]

एतस्मादेव अयं कविवर एव अतुल इति नाम्नि लोपहेतुना तोल इति व्याहृतोऽभवत् एवं तत्समकालिक पण्डितानामभिमतम् । कवेरस्य वर्णना पाटवे अलङ्कारवृत्तविन्यासक्रमः अत्यन्तं रुचिरं वर्तते । काव्ये तु आधिक्येन फलितप्रयोगादिकाः नैव दृश्यते। तथापि रचना सौष्ठवेन आविष्करणसौकुमार्येण अतुल तोलयोः सामञ्जस्यं वर्ततेति निर्णेतुं शक्नुमः।'अतुला' इति तोलनस्य संस्कृतरूपं भवितुमर्हति, परन्तु अस्य काव्यस्य लेखकः तोलः इति निश्चयेन वक्तुं नप्रभवामः। काव्यस्यास्य आरम्भे वंशस्य पौराणिक-उत्पत्ति-इत्यादीनां पौराणिकविषयाणां व-र्णना वर्तते; परन्तु यथा यथा कार्यं प्रगच्छति तथा तथा राजानां विवरणं, भौगोलिकसविशेषताः, मन्दिराणि अन्ये च संस्कृतिकेन्द्राणि, विभिन्नधार्मिकसम्प्रदायाः, कला, साहित्यं, वास्तुकला, वाणिज्यम्, नौकायानं च समाविष्टाः सन्ति। महाकाव्यविधायाः साहित्यिकपरम्पराणां उपयोगेन, उत्तरकेरलस्य इतिहाससम्बद्धविज्ञानस्य शास्त्रीयपर्यवेक्षणेन प्रदेशस्यास्यइतिहासस्य- सविशेषपरामर्शप्रदातृषु अन्यतमः अयं ग्रन्थः। विषयस्य विश्लेषणेन प्राचीनभारतीयइतिहासलेखन-ेन समं साहित्यात्मक रचनापाटवमपि कविना प्रकटयति । स्मर्तव्यं यत् मूषकवंशस्य लेखनकाले अतुलः संस्कृतस्य माध्यमेन इतिहासस्य अभिलेखनं कुर्वन् आसीत् तथा च युगपत् महाकाव्यं लिखित्वा शास्त्रीयकाव्यस्य मानदण्डान् अनुसृत्य परम्परारक्षणमपि कुर्वन्नासीत्। अतुलः प्रादेशिकइतिहासस्य --तथ्यानां संस्कृतमहाकाव्याप्रय संरचनायां समायातुं-त्वं करोति । मुषिकवंश इति नाम्ना प्रसिद्धस्य उत्तरकेरलस्य राजकुलस्य तथा प्रख्यातराजवंशस्य विषये रोचकं ऐतिहासिकं काव्यम् अस्ति एतत्। तस्य मूषिकवंशः, उदयवर्मचरितं चेति तत्तत्कालीनोत्तरकेरलचरित्रत्वेन कृती अवशिष्यते [4] इति उळ्ळूर एस् परमेश्वय्यरः स्वीयकेरलसाहित्यचरित्रे अभिप्रैति। ऐतिहासिककाव्यस्य मूषिकवंशस्य लेखकस्यातुलस्य व्यक्तिगतविवरणस्य विषये वयं किमपि न जानीमः। काव्यमिति, देशचरित्रम् इति द्विधा अभिनन्दनीयम् भवति “मूषिकवंश”मिति सः प्रस्तौति। ‘इत्यतुलकृतौ मूषिकवंशे’ इति सर्गस्य अन्ते दृश्यते इत्यतः ग्रन्थकर्तुः नाम “अतुलः” इति अवगम्यते। अपूर्णस्य अस्य काव्यस्य इदानीं लभ्यमान हस्तलिखितग्रन्थेषु त्रिष्वपि आहत्य अष्टपञ्चाशदधिकसहस्रम् पद्यानि एव सन्ति। ‘राजधर्मः’ इति नामयुतः श्रीकण्ठः नाम कोलत्तिरिराजस्य शासनमेव मुख्यप्रतिपाद्यम्। अतुलः श्रीकण्ठः च समकालिकौ आस्तामिति अपि च श्रीकण्ठस्य सदस्यः आसीदतुलकविः इति च प्रस्तावः अस्ति। क्रिस्तोः परम् द्वादशोत्तरसहस्रतमवर्षादारभ्य त्रित्वारिशदुत्तरसहस्रतमव्रषपर्यन्तम् श्रीकण्ठस्य कालः इति आधारेण क्रिस्तोः परम् एकादशशतकस्य पूर्वार्धे मूषिकवंशकाव्यरचनाभवदिति उळ्ळूरमहाशयप्रभृतयः पण्डिताः अभिप्रयन्ति। तस्य राज्ञः कालात् आरभ्य काव्यस्य रचनाकाले शासतां श्रीकण्ठराजपर्यन्त शासकानां चरित्रं अस्मिन् काव्ये अतुलेन विव्रियते।

## संदर्भ सूची


1. Itihyamala - Kottarathil Shankunni Lakshmi Bhai Granthavali
2. Dictionary of Folklore. - Kerala Bhasha Institute
3. Mooshikavamsa-Athula1/15. University of Kerala thiruvananthapuram
4. Ulloor S. Parameswara Iyer. Keraḷa Sahitya Charitraṃ. Prakasanavibhagaṃ, Keraḷasarvakalasala.